# Brahmana Kritam Surya Stotram 18

# ब्रह्मणा कृतं सूर्यस्तोत्रम् १८

## Document Information

Text title : Brahmana Kritam Surya Stotram 18

File name : brahmaNAkRRitaMsUryastotram18.itx

Category : navagraha, mArkaNDeyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : mArkaNDeyapurANa | adhyAya 100/5-12||

Latest update : October 12, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 12, 2024

*sanskritdocuments.org*

# ब्रह्मणा कृतं सूर्यस्तोत्रम् १८

ब्रह्मोवाच ।
नमस्ये यन्मयं सर्वमेतत्सर्वमयश्च यः ।
विश्वमूर्तिः परं ज्योतिर्यत्तद्ध्यायन्ति योगिनः ॥ ५॥

य ऋङ्मयो यो यजुषां निधानं साम्नां च यो योनिरचिन्त्यशक्तिः ।
त्रयीमयः स्थूलतयार्धमात्रा परस्वरूपो गुणपारयोग्यः ॥ ६॥

त्वां सर्वहेतुं परमं च वेद्यमाद्यं परं ज्योतिरवेद्यरूपम् ।
स्थूलं च देवात्मतया नमस्ते भास्वन्तमाद्यं परमं परेभ्यः ॥ ७॥

सृष्टिं करोमि यदहं तव शक्तिराद्या
तत्प्रेरितो जलमहीपवनाग्निरूपाम् ।
तद्देवताऽऽदिविषयां प्रणवाद्यशेषां
नात्मेच्छया स्थितिलयावपि तद्वदेव ॥ ८॥

वह्निस्त्वमेव जलशोषणतः पृथिव्याः
सृष्टिं करोषि जगतां च तथाद्य पाकम् ।
व्यापी त्वमेव भगवन्गगनस्वरूपं
त्वं पञ्चधा जगदिदं परिपासि विश्वम् ॥ ९॥

यज्ञैर्यजन्ति परमात्मविदो भवन्तं
विष्णुस्वरूपमखिलेष्टिमयं विवस्वन् ।
ध्यायन्ति चापि यतयो नियतात्मचित्ताः
सर्वेश्वरं परममात्मविमुक्तिकामाः ॥ १०॥

नमस्ते देवरूपाय यज्ञरूपाय ते नमः ।
परब्रह्मस्वरूपाय चिन्त्यमानाय योगिभिः ॥ ११॥

उपसंहर तेजो यत्तेजसः संहतिस्तव ।
सृष्टेर्विघाताय विभो सृष्टौ चाहं समुद्यतः ॥ १२॥

इति मार्कण्डेयपुराणे शततमाध्यायानतर्गतं ब्रह्मणा कृतं
सूर्यस्तोत्रं समाप्तम् ।

मार्कण्डेयपुराण । अध्याय १००/५-१२॥

mArkaNDeyapurANa . adhyAya 100/5-12..

Proofread by PSA Easwaran

*Brahmana Kritam Surya Stotram 18*

pdf was typeset on October 12, 2024

Please send corrections to *sanskrit@cheerful.com*